श्री काळिका अर्गळ स्तोत्रं

श्री काळिका अर्गळ स्तोत्रं

अस्य श्री काळिकार्गळ स्तोत्रस्य भैरव ऋषिरनुष्टुप् छंदः श्रीकाळिका देवता मम सर्वसिद्धिसाधने विनियोगः |

ॐ नमस्ते काळिके देवि आद्यबीजत्रय प्रिये |
वशमानय मे नित्यं सर्वेषां प्राणिनां सदा || 1 ||

कूर्चयुग्मं ललाटे च स्थातु मे शववाहिना |
सर्वसौभाग्यसिद्धिं च देहि दक्षिण काळिके || 2 ||

भुवनेश्वरि बीजयुग्मं भ्रूयुगे मुंडमालिनी |
कंदर्परूपं मे देहि महाकालस्य गेहिनि || 3 ||

दक्षिणे काळिके नित्ये पितृकाननवासिनि |
नेत्रयुग्मं च मे देहि ज्योतिरालेपनं महत् || 4 ||

श्रवणे च पुनर्लज्जाबीजयुग्मं मनोहरं |
महाश्रुतिधरत्वं च मे देहि मुक्त कुंतले || 5 ||

ह्रीं ह्रीं बीजद्वयं देवि पातु नासापुटे मम |
देहि नानाविधि मह्यं सुगंधिं त्वं दिगंबरे || 6 ||

पुनस्त्रिबीजप्रथमं दंतोष्ठरसनादिकं |
गद्यपद्यमयीं वाजीं काव्यशास्त्राद्यलंकृतां || 7 ||

अष्टादशपुराणानां स्मृतीनां घोरचंडिके |
कविता सिद्धिलहरीं मम जिह्वां निवेशय || 8 ||

वह्निजाया महादेवि घंटिकायां स्थिरा भव |
देहि मे परमेशानि बुद्धिसिद्धिरसायकं || 9 ||

तुर्याक्षरी चित्स्वरूपा काळिका मंत्रसिद्धिदा |
सा च तिष्ठतु हृत्पद्मे हृदयानंदरूपिणी || 10 ||

षडक्षरी महाकाळी चंडकाळी शुचिस्मिता |
रक्तासिनी घोरदंष्ट्रा भुजयुग्मे सदाऽवतु || 11 ||

सप्ताक्षरी महाकाळी महाकालरतोद्यता |
स्तनयुग्मे सूर्यकर्णो नरमुंडसुकुंतला || 12 ||

तिष्ठ स्वजठरे देवि अष्टाक्षरी शुभप्रदा |
पुत्रपौत्रकलत्रादि सुहृन्मित्राणि देहि मे || 13 ||

दशाक्षरी महाकाळी महाकालप्रिया सदा |
नाभौ तिष्ठतु कल्याणी श्मशानालयवासिनी || 14 ||

चतुर्दशार्णवा या च जयकाळी सुलोचना |
लिंगमध्ये च तिष्ठस्व रेतस्विनी ममांगके || 15 ||

गुह्यमध्ये गुह्यकाळी मम तिष्ठ कुलांगने |
सर्वांगे भद्रकाळी च तिष्ठ मे परमात्मिके || 16 ||

काळि पादयुगे तिष्ठ मम सर्वमुखे शिवे |
कपालिनी च या शक्तिः खड्गमुंडधरा शिवा || 17 ||

पादद्वयांगुळिष्वंगे तिष्ठ स्वपापनाशिनि |
कुल्लादेवी मुक्तकेशी रोमकूपेषु वै मम || 18 ||

तिष्ठतु उत्तमांगे च कुरुकुल्ला महेश्वरी |
विरोधिनी विरोधे च मम तिष्ठतु शंकरी || 19 ||

विप्रचित्ते महेशानि मुंडधारिणि तिष्ठ मां |
मार्गे दुर्मार्गगमने उग्रा तिष्ठतु सर्वदा || 20 ||

प्रभादिक्षु विदिक्षु मां दीप्तां दीप्तं करोतु मां |
नीलाशक्तिश्च पाताळे घना चाकाशमंडले || 21 ||

पातु शक्तिर्बलाका मे भुवं मे भुवनेश्वरी |
मात्रा मम कुले पातु मुद्रा तिष्ठतु मंदिरे || 22 ||

मिता मे योगिनी या च तथा मित्रकुलप्रदा |
सा मे तिष्ठतु देवेशि पृथिव्यां दैत्यदारिणी || 23 ||

ब्राह्मी ब्रह्मकुले तिष्ठ मम सर्वार्थदायिनी |
नारायणी विष्णुमाया मोक्षद्वारे च तिष्ठ मे || 24 ||

माहेश्वरी वृषारूढा काशिकापुरवासिनी |
शिवतां देहि चामुंडे पुत्रपौत्रादि चानघे || 25 ||

कौमारी च कुमाराणां रक्षार्थं तिष्ठ मे सदा |
अपराजिता विश्वरूपा जये तिष्ठ स्वभाविनी || 26 ||

वाराही वेदरूपा च सामवेदपरायणा |
नारसिंही नृसिंहस्य वक्षःस्थलनिवासिनी || 27 ||

सा मे तिष्ठतु देवेशि पृथिव्यां दैत्यदारिणी |
सर्वेषां स्थावरादीनां जंगमानां सुरेश्वरी || 28 ||

स्वेदजोद्भिजांडजानां चराणां च भयादिकं |
विनाश्याप्यभिमतिं च देहि दक्षिण काळिके || 29 ||

य इदं चार्गळं देवि यः पठेत्काळिकार्चने |
सर्वसिद्धिमवाप्नोति खेचरो जायते तु सः || 30 ||

इति श्री काळी अर्गळ स्तोत्रं |